सामयिकात्यन्ताभावत्वसम्भवाच्च। तस्मान्नास्मत्सिद्धान्तेऽभावोऽतिरिक्तः किञ्च घटो ध्वस्तो घटो भावी घटोऽत्र नास्तीत्यादिप्रत्ययनियामकतया किञ्चिद्वस्त्वाकाङ्क्षायां तद्भावरूपमेव कल्प्यते लाघवात्। अभावस्यादृष्टस्य कल्पने गौरवादिति" प्र०भा० ॥ "नासदुत्पादो नृशृङ्गवत्" सू०॥ नरशृङ्गतुल्यस्यासत उत्पादोऽपि न सम्भवतीत्यर्थः॥ "उपादाननियमात्" सू०॥ मृद्येव घट उत्पद्यते तन्तुष्वेव पट इत्येवं कार्य्याणामुपादानकारणं प्रति नियमोऽस्ति। स न सम्भवति उत्पत्तेः प्राक् कार्य्यासत्तायां हि न कोऽपि कारणे विशेषोऽस्ति येन कश्चिदेवासन्तं जनयेन्नेतरमिति। विशेषाङ्गीकारे च भावत्वापत्तेर्गतमसत्तया। स एव च विशेषोऽस्माभिः कार्य्यस्यानागतावस्थेत्युच्यत इति। एतेन यद्वैशेषिकाः प्रागभावमेव कार्योत्पत्तिनियामकं कल्पयन्ति तदप्यपास्तम्। अभावकल्पनापेक्षया भावकल्पने लाघवात्। भावानां दृष्टत्वादन्यानपेक्षत्वाच्च। किञ्चाभावेषु स्वतो विशेषे भावत्वापत्तिः। प्रतियोगिविशेषस्य प्रतियोग्यसत्ताकाले नास्ति। अतोऽभावानामविशिष्टतया न कार्य्योत्पत्तौ नियामकत्वं युक्तमिति॥ "शक्तस्य शक्यकरणात्" सू०॥ कार्य्यशक्तिमत्त्वमेवोपादानकारणत्वम् अन्यस्य दुर्वचत्वात् लाघवाच्च। सा शक्तिः कार्य्यस्यानागतावस्थैवेत्यतः शक्तस्य शक्यकार्य्यकरणान्नासत उत्पाद इत्यर्थः॥ "कारणभावाच्च" सू० उत्पत्तेः प्रागपि कार्यस्य कारणाभेदः श्रूयते तस्माच्च सत्कार्यसिद्धा नासदुत्पाद इत्यर्थः। कार्यस्यासत्त्वे हि सदसतोरभेदानुपपत्तिरिति। उत्पत्तेः प्राक् कार्य्याणां कारणाभेदे च श्रुतयः। "तद्धेदं तर्ह्यव्याकृतमासीत्। सदेव सौम्येदमग्र आसीत्। आत्मैवेदमग्र आसीत्। आप एवेदमग्र आसुरित्याद्याः॥ "न भावे भावयोगश्चेत्" सू०॥ नन्वेवं कार्यस्य नित्यत्वे सति भावरूपे कार्ये भावयोग उत्पत्तिप्रयोगो न सम्भवति असतः सत्त्व एवोत्पत्तिव्यवहारादिति चेदित्यर्थः॥ "नाभिव्यक्तिनिबन्धनौ व्यवहाराव्यवहारौ" सू०॥ कार्योत्पत्तेर्व्यवहाराव्यवहारौ कार्य्याभिव्यक्तिनिमित्तकौ। अभिव्यक्तित उत्पत्तिव्यवहारोऽभिव्यक्त्यभावाच्चोत्पत्तिव्यवहाराभावः न त्वसतः सत्त्वेत्यर्थः। अभिव्यक्तिश्च न ज्ञानं किन्तु वर्त्तमानावस्था। कारणव्यापारोऽपि कार्यस्य वर्त्तमानलक्षणपरिणाममेव जनयति। सतश्च कार्यस्य कारणव्यापारादभिव्यक्तिमात्रं लोकेऽपि दृश्यते। यथा शिलामध्यस्थप्रतिमाया लैङ्गिकव्यापारेणाभिव्यक्तिमात्रं तिलस्थतैलस्य च निष्पीड़नेन, धान्यस्यतण्डुलस्य चावघातेनेति। तदुक्तं वाशिष्ठे। "सुसूक्ष्मावस्थया चक्रपद्मरेखाः शिलोदरे। यथा स्थिताश्चितेरन्तस्तथेयं जगदावली"॥ एतेषामिवास्माकमप्यनागतावस्थायाः प्रागभावाख्याया अभिव्यक्तिहेतुत्वाच्चेति। नन्वतीतमप्यस्तीत्यत्र किं प्रमाणं? न ह्यनागतसत्तायामिव श्रुत्यादयोऽतीतसत्तायामपि स्फुटमुपलभ्यन्त इति। मैवम्। योगिप्रत्यक्षत्वान्यथानुपपत्त्यानागतातीतयोरुभयोरेव सत्त्वसिद्धेः प्रत्यक्षसामान्ये विषयस्य हेतुत्वात्। अन्यथा वर्त्तमानस्यापि प्रत्यक्षेणासिद्ध्यापत्तेः। तस्माद्धियामौत्सर्गिकप्रामाण्येनासति बाधके योगिप्रत्यक्षेणातीतमप्यस्तीति सिद्ध्यति योगिनामतीतानागतप्रत्यक्षे च श्रुतिस्मृतीतिहासादिकं प्रमाणं योगवार्त्तिके प्रपञ्चितमिति। नन्वभिव्यक्तिरपि पूर्व्वं सती वाऽसती वा। आद्ये कारणव्यापारात् प्रागपि कार्यस्याभिव्यक्त्या स्वकार्यजनकत्वापत्तिः कारणव्यापारश्च विफलः। अन्त्ये चाभिव्यक्तावेव सत्कार्यसिद्धान्तक्षतिः असत्या एवाभिव्यक्तेरभिव्यक्त्यङ्गीकारादिति अत्रोच्यते। कारणव्यापारात् प्राक् सर्वकार्य्याणां सदासत्त्वाभ्युपगमेनोक्तविकल्पानवकाशाद्घटवत् तदभिव्यक्तेरपि वर्त्तमानावस्थया प्रागसत्त्वेन तदसत्तानिवृत्त्यर्थं कारणव्यापारापेक्षणात्। अनागतावस्थया च सत्कार्यसिद्धान्तस्याक्षतेः। नन्वेकदा सदसत्त्वयोर्विरोध इति चेत्। प्रकारभेदस्योक्तत्वात्। नन्वेवमपि प्रागभावानङ्गीकारेण प्रागसत्त्वमेव कार्य्याणां दुर्वचमिति। मैवम्। अवस्थानामेव परस्पराभावरूपत्वादिति॥ ननु सत्कार्यसिद्धान्तरक्षार्थमभिव्यक्तेरप्यभिव्यक्तिरेष्टव्येत्यत आह। "पारम्पर्यतोऽन्वेषणा वीजाङ्कुरवत्" सू०॥ पारम्पर्यतः परम्परारूपेणैवाभिव्यक्तेरनुधावनं कर्त्तव्यम् वीजाङ्कुरवत् प्रामाणिकत्वेन चास्या अदोषत्वादित्यर्थः। वीजाङ्कुराभ्यां चात्रायमेव विशेषो यद्वीजाङ्कुरस्थले क्रमिकपरम्परयानवस्था, अभिव्यक्तौ चैककालीनपरम्परयेति। प्रामाणिकत्वन्तु तुल्यमेवेति। सर्वकार्य्याणां स्वरूपतो नित्यत्वमवस्थाभिर्विनाशित्वं चेति पातञ्जलभाष्ये वदद्भिर्व्यासदेवैरपीयमनवस्था प्रामाणिकत्वेन स्वीकृतेति। "उत्पत्तिवद्वाहदोषः" सू०॥ यथा घटोत्पत्तेरुत्पत्तिः स्वरूपमेव वैशेषिकादिभिरसदुत्पादवादिभिरिष्यते लाघवात् तथैवास्माभिर्घटाभिव्यक्तेरप्यभिव्यक्तिः स्वरूपमेवैष्टव्या लाघवात्। अत उत्पत्ताविवाभिव्यक्तावपि नानवस्थादोष इत्यर्थः। अथैवमभिव्यक्तेरभिव्यक्त्यनङ्गीकारे कारणव्यापारात् प्राक् तस्याः सत्त्वानुपपत्त्या सत्कार्यवादक्षतिरिति चेन्न। अस्मिन् पक्षे सत